आद्यादिवादोमधु(तो मिथु)ना भाग्यां मनुयं(दभूवन्महिताः)
सुताः ॥

चौण्डपार्यादित्यदेवमञ्चव(पा)र्याभिधाः स्त्रि(त्र)यः ।
यानमंस्त जनो देवांस्त्रिलाकाहितसम्पदा ॥

त्रीन्वेदान्सर्वविज्ञानांस्त्रीनग्नीन्पावनन्वतः ।
उत्साही सर्वकृत्येषु प्रभुमन्त्रा(न्त्र्य)नुजद्वय ॥

चौण्डुपार्योऽमात्यवर्गः सोऽभूत्भूपतिभूपते. ।
सद्गुरूपातसद्विद्यो विष्णुसद्दर्शसूक्तिभिः ॥

विद्वत्प्रयोगं सफ(क)लं क्रतुमाहरतु त्वयम्(क्रतूना-
माकरोम्यहम्)

कल्पसूत्रेष्वनेकेषु सर्वक्रतुसमन्वयात् ॥

आपस्तम्बाचार्यसूत्र प्रधानं प्रचुर त(त्व)तः ।
व्याख्याम्यते च तत्सूत्रं हौत्रौद्गात्र(त्रे) प्रसङ्गतम्(तः) ॥

सूत्रार्थमन्त्रव्याख्यार्थप्रयोगप्रतिपादनैः ।
ब्राह्मणं कल्पसूत्राणि मीमांसान्यायविस्तरौ ॥

तर्कव्याकरणे छन्दो निरुक्तज्योतिषे आप ।
वेदभाष्याणि सर्वाणि स्मृतितत्सङ्ग्रहानपि ॥

सूत्रव्याख्यास्तथा सर्वा आचारं तद्विदामपि ।
कलाविद्या शिल्पविद्या अपि संशोध्य यत्नतः ॥

प्रयोगरत्नमालेय तन्यत हृदयङ्गमा ॥

गणयन्तो गुणानेव सर्वे तां बहुमन्यताम् ।
परिग्रहो हि महतां गुणेन्दीवरचन्द्रिका ॥

यद्वा सन्तो नार्थनीया नितरामितरे यतः ।
गुणानां सदसद्भावौ स्वयमेव नियच्छतः ॥

❀ ✲ ❀

त्रिंशत्प्रश्नात्मकं सूत्रमापस्तम्बमुनीरितम् ।
श्रौतगार्ह्यस्मार्तकर्मबोधकं तत्र पञ्चभिः ।
पञ्चविंशतिभिः प्रश्नैर्गार्ह्यस्मार्तविनिर्णयः ।
इतरैः पञ्चविंशत्या श्रौततन्त्रं प्रपञ्च्यते ।

तत्रादिमैर्नवैः(व) प्रश्नैर्हविर्यज्ञविधिक्रमः ॥

अन्यै(न्त्यै)ः षोडशभिः सोमः प्राधान्येन पपञ्चितः ।

तत्रादिमैस्त्रिभिर्दर्शपूर्णमासौ तदादिमे ॥

एकदेशे पिण्डपितृयज्ञोऽपि प्रातपादितः ।

चतुर्थे तद्याजमानमाधानं पञ्चमे ततः(मतम्) ॥

षष्ठेऽग्निहोत्राग्रयणे सप्तमे पशुसप्तमे ।

चातुर्मास्यान्यथ प्रायश्चित्तानां नवमे विधिः ॥

अग्निष्टोमप्रपञ्चोऽथ पञ्चभिर्दशमादिभिः ।

प्रश्नेऽत्र दशमे दीक्षा प्रायणीये स्वराट्क्रमः ॥

आतिथ्येष्टिरिति प्रोक्तं सप्तपञ्चचतुष्टयम् ।

एकादशे प्रवर्ग्याणां सप्रायश्चित्तको विधिः ॥

द्वादशे षो(ष)डशसद्यासग्निष्टोमीयवर्णनम् ।

प्रश्ने त्रयोदशे प्रातस्सवनाख्यचतुर्दशे ।

सवने द्वेऽथावभृथोऽदयनीयपशाविधिः ॥

प्रश्ने पञ्चदशे चोक्थ्यषोडशी चातिरात्रकः ।

आप्तोर्यामैकादशिना(न?)त्रत्वं दक्षिणाविधिः ।

प्रसङ्गाद्दशहोत्रादिप्रायश्चित्तञ्च सौमिकम् ॥

अग्निसाङ्गो द्वयोस्तत्र षोडशे प्रथमा चितिः ।

प्रश्ने सप्तदशे शिष्टा द्विविषाहस्त्रिके(?) अपि ॥

अष्टादशे वाजपेयराजसूयौ सविस्तरौ ।

एकोनविंशे सौत्रामणिकाठकचितिक्रमः ॥

तत्रैव काम्याः पशवः इष्टयश्च प्रपञ्चिताः ।

विंशेऽश्वमेधपुरुषमेधयोर्विधिविस्तरः ॥

एकाविंशे द्वादशाहमहाव्रतविधिर्गवाम् ।

उत्सर्गिणामप्ययनं द्वाविंशेऽहीनविस्तरः ॥

त्रयोविंशे ततः प्रश्ने सत्रायनविधिक्रमः ।

चतुर्विंशे ततः प्रश्ने न्यायप्रवरहौत्रिकम् ॥

पञ्चविंशे च षड्विंशे गार्ह्या मन्त्राः प्रपञ्चिताः ।

प्रश्नेऽथ सप्तविंशे स्याद्व्रतन्त्रविधिक्रमः ।

अष्टाविंशैकोनत्रिंशप्रश्नयोः स्मार्तसत्क्रियाः ॥

सामान्यतो विशेषेण त्रिंशे शुल्वविनिर्णयः ।

एवं सामान्यतः सर्वप्रश्नानामर्थसङ्ग्रहः ॥

End.

एवं विहितमिष्टीयपशुबन्धानां ब्रह्मत्वं ब्रह्मत्वम् । यदेवं विहितं दर्शपूर्णमासयोर्ब्रह्मत्वमिदमेव सर्वेष्टीनां पशुबन्धानाञ्च ब्रह्मत्वम् । विशेषस्तु तत्र तत्र वक्ष्यते । अतोऽन्यत्र स व्यावृत्तौ ब्रह्मयजमानाविति यदुक्तं तदकरणेप्यदोष इत्यर्थः ।

इति ब्रह्मत्वान्ततन्त्रमन्त्रव्याख्यासुगन्धिभिः ।

सूक्तिप्रसूनैः पुष्णातु पुमर्थान्दुरुषोत्तमः ॥

प्राशित्रादिब्रह्मत्वान्यपदार्थोक्तिसमुज्वलः ।

तृतीयो व्याकृत प्रश्नोऽनुनिर्वाप्यादिसक्रियः ॥ १ ॥

Colophon :

इति श्रीमद्राजाधिराजपरमेश्वरश्रीवीरहरिहरमहाराजसाम्राज्यधुरन्धरप्रतापयुवबुक्कभूपालश्रीरार्णवपूर्णचन्द्रस्य राजव्यासराजवाल्मी-

के: कर्मब्रह्माध्वनीनस्य श्रीवीरभूपतिभूपालस्य मन्त्रिणा चिन्ना-
र्यानन्दनेनादित्यदेवमञ्चपाचार्याग्रजन्मना चौण्डपाचार्येण वि-
रचितायामापस्तम्बीयाध्वरतन्त्रस्वतन्त्रव्याख्यायां प्रयोगरत्नमालायां
तृतीये प्रश्ने षष्ठः पटलः ॥

श्रीदक्षिणामूर्तिगुरुचरणारविन्दयोरर्पितास्तु प्रयोगरत्नमाला ॥

समाप्तश्चायं तृतीयः प्रश्न ॥

Subject: Āpastambaśrautasūtravyākhyā, otherwise known as Prayogaratnamālā—a commentary on these sūtras belonging to Black Yajur Veda, 1-3 Praśnas

Remarks —The Ms. is in a very good condition. On the title page is given 'दर्शपूर्णमासप्रश्नत्रयप्रयोगरत्नमाला पिङ्गलोपनाम्नः श्रीपतिरायस्य' i.e. the Ms. belonged to one Piṅgala Śrīpatirāya.

The long beginning given in this Ms contains historically interesting information on the succession of Vijayanagar dynasty, though the author has in view a completely different one from the accepted order of succession in the same dynasty. It is probably, as Dr Burnell himself observes, more correct than the four or five lists collected by Lassen (L. A-K. IV., Beilage, pp 976 ffg.)

Again, the introductory verses of this work give a clue to the size and contents of the Āpastamba Kalpasūtras—since probably the oldest authority on this subject might be Caunḍapācārya of the 15th century.

After giving the size and contents of the Āpastamba Sūtras as given by Caunḍapācārya, Dr. Burnell observes on page 17 of his Catalogue as follows:—

"It is thus evident that Caunḍappa's account is correct. One point remains to be noticed. He (Caunḍappa) entirely

omits mention of two Praśnas which treat of paitṛmedhika rites, and which are reckoned usually to be the thirty-first and thirty-second of the work. In some Mss however of the thirtieth, thirty-first and thirty-second Praśnas (which are not uncommon in S. India), I have seen them numbered as twenty-fifth, twenty-sixth, and twenty-seventh, and, apparently, excluding the Dharmasūtra.

"Commentaries on the different sections of this huge Sūtra are numerous; and in fragments, at all events, are not uncommon in S. India; but I cannot hear of anything like a complete copy of any one of them. Dhūrtasvāmin, and perhaps also, Kapardisvāmin, have written commentaries (it is said) on the whole. The commentary by the first is very brief in parts and not of much use in restoring the text as far as the 18 Praśnas go which I possess. It has been annotated by Kāśikarāma. There is also a comment on these Sūtras by Gurudevasvāmin, which is probably an old one, and another (of recent time) by Ahobalasūri. It is not unlikely that Haradatta commented on the whole 30 sections; the tradition in S. India, in fact, that he is the same as Rudradatta, whose commentary has been already described. Under the name of Haradatta are commentaries on the Mantraprašna, Grhya and Dharma sections (xxvi, xxvii, xxviii, and xxix); his commentary on the gṛhya section he termed "Anākulā." (Su)darśanā(cā)rya has also explained the gṛhya Prśana. I have a copy of an anonymous commentary on the Paribhāṣā—(sāmānya) sūtra which is probably by Pālavṛntasvāmin. The Śulba praśna has been annotated by Karavindasvāmin, Kapardisvāmin and Sundararāja. There are also prayoga treatises which are more easily to be had than the commentaries and which are described further on.

"Of the Āpastambasūtras but little has been published. Dr Max Muller long ago translated the Paribhāṣā Section into German Dr Bühler has edited the Dharmapraśnas (Bombay, 1868-1871 with extracts from Haradatta's commentary and critical notes, and he promises shortly a translation which has been sometime nearly printed Prof. Eggeling has long promised an edition of the Gṛhya chapter Perhaps, the most interesting section of the whole is the Śulba chapter, which treats of the construction of altars This involves (as I pointed out in 1896 in my catalogue p 29) considerable geometrical knowledge, and must throw much light on the beginnings of Indian Geometry. Dr Thibaut has recently taken up this subject, and it is to be hoped that he will be able to bring out an edition The Āpastamba and Baudhāyana sūtras differ much in this respect, and a comparison of the two is requisite, to say nothing of reference to the traditional diagrams for constructing these altars which may still be found here and there with Vedic priests, and without which (though perhaps sometimes erroneous) it is impossible to understand the necessarily great variety of bricks which are used."

The author of this work is Caṇḍapācārya who is said to be the elder brother of Ādityadeva and Maṇcapācārya, and the son of one Cunāryā He is again known as the famous Minister of Śrī Vīrabhūpati of Vijayanagar dynasty.

॥ आपस्तम्बश्रौतसूत्रव्याख्या ॥

2049. ĀPASTAMBAŚRAUTASŪTRAVYĀKHYĀ.

Burnell's Catalogue No. 3854 Page 16. Left column.

Substance—Paper. Size—11½ × 4¼ inches. Sheets—117. Lines—12 to a Page. Script—Devanāgarī. No. of Granthas—3050 Author—Caunḍapācārya. First and Second Praśnas—incomplete.

Beginning.

श्रीमहागणपतये नमः ।

श्रीपाण्डुरङ्गाय नमः ॥ श्रीसरस्वत्यै नमः ।

श्रीगुरुभ्यो नमः । श्रीनृसिंहाय नमः ॥ ॐ ॥

समुन्मूलितसर्वाङ्गकृतार्था भारती यतः ।

तं भारतीतीर्थगुरुं लोकैकगुरुमाश्रये ॥ १ ॥

अस्तिस्वस्तिनिवासो वा वासुदेवनिवासभूः ।

क्षीरनिधिः पद्मसुधासुधाकरसुधाकरः ॥ २ ॥

ततः समुदभूद्भूरियशसः शशलाञ्छनः ।

योऽसौ श्रुतिशिरोरत्नशिरोरश्मितविग्रहः ॥ ३ ॥

तस्मादजनि भूजानिकुलं कलिमलापहम् ।

यादवं यदुजन्मापि जन्मालब्ध परः पुमान् ॥ ४ ॥

तत्राभूत्सङ्गमः सम्राट्सम्राडग्रीकसम्भवः ।

हरिरप्यवताराणामेको(के)नान्येन सङ्गमः ॥ ५ ॥

ततोऽभूवन्पञ्च भूपा भूतवज्जगतः कृते ।

हर्षपक्ष्मापभूकशाकेशकम्पमुदारपाः ॥ ६ ॥

तेष्वन्यकृतदिक्पाला.....वैक्तितः ।

वेदान्व्याख्यन्माधवार्यः सायणार्यवपुर्धरः ॥ ७ ॥

Same as No 2048.

End.

॥ क्षत्रस्य त्वौजसे यन्त्राय धर्त्रावगृह्णामि ॥ क्षत्रस्य क्षत्रियजातेः ओजः यत्सामर्थ्यं । शेषं व्याख्यातम् ॥ विशे त्वा यन्त्राय धर्त्राय गृह्णामि । वैश्यजातेः कृषिवाणिज्यादि(षु) यत्सामर्थ्यं तस्मै यन्त्रायेत्यादिपूर्ववत् ॥ सुवीर्याय त्वा गृह्णामि ॥ सुवीर्यं सर्वेषां स्वस्वव्यापारे सामर्थ्यातिशयः । शेषेण ध्रुवायां चतुः पञ्चकृत्वो वा प्रतिमन्त्रं । शेषेणानुवाकशेषेण । अन्यत्पूर्ववद्व्याख्येयम् । प्रा(जापत्यानि यजूंषि) ।

Colophon : Same as No. 2048

Subject : Āpastambaśrautasūtravyākhyā, otherwise known as Pravogaratnamālā. First and Second Praśnas.

Remarks.—The Ms. is in a decaying condition. This Ms. abruptly ends in the middle of the commentary on the second paṭala of the second Praśna of th Āpastambaśrautasūtra.

The six and a half verses given in the beginning are additionally found in this Ms and in No. 2050 The readings of this Ms. are slightly different from those found in No 2048. Some of the important variations in readings found in this Ms. are given within circular brackets in No. 2048.

॥ आपस्तम्बश्रौतसूत्रव्याख्या ॥

2050. ĀPASTAMBAŚRAUTASŪTRAVYĀKHYĀ.

Burnell's Catalogue No. 3850. Page 16. Left column. Substance—Paper Size—11 × 4½ inches Sheets—158. Lines—10 to a Page. Script—Devanāgarī. No. of Gran-

thas—3750 Author—Caundapācārya First and second Praśnas—incomplete.

Beginning—Same as No 2040

End :

अयं वेद पृथिवीमन्वाविन्द-
द्गुहामतीं गहने गह्वरेषु ।
स विन्दति यजमानाय लोक-
मच्छिद्रं यज्ञं भूरिकर्मा करोतु ॥

अयं वेदो वेदिरूपां पृथिवीं असुरेभ्योऽनुक्रमेणालभत। तथा च ब्राह्मणम । वेदेन वै देवास्त(द)सुराणामिति । किंविधां पृथिवीं गुहा गोप्ये तत्रापि गहने द्रष्टुमशक्ये स्थाने तत्रापि गह्वरेषु दुष्प्राप्येषु प्रदेशेषु वर्तमानां । तथा च ब्राह्मणम् । वराहोऽयं वामशोष इति । तादृशो वेदः यजमानार्थं स्थानविशेषं लभतां । तत्सिद्ध्यर्थं बहुव्यापारः सन् यज्ञमविकलं करोतु ॥

* * * * * *

प्रागग्रैर्दक्षिणोत्तरैरुत्तरतोऽधरैः प्राक् प्रतिपयो(?)दपवर्गं परिस्तीर्यान्तरश्रोण्योत्तरतो दर्भैर्होतृषदनं कल्पयित्वा सामिधेनीराधातुमिध्ममादत्ते ॥

इत्थं हविरासादनान्तमन्त्रव्याख्यासुगन्धिभिः ।
सूक्तिप्रसूनैः पुष्णातु पुमर्थान्पुरुषोत्तमः ॥

Colophon :

इति श्रीमद्राजाधिराज + प्रयोगरत्नमालायां
द्वितीयप्रश्ने तृतीयः पटलः ॥

Subject : Prayogaratnamālā. First and second Praśnas.

Remarks:—The Ms is in good condition It breaks off in the third paṭala of the Second Praśna.

॥ आपस्तम्बश्रौतसूत्रव्याख्या

2051. ĀPASTAMBAŚRAUTASŪTRAVYĀKHYĀ.

Burnell's Catalogue No. 3819 Page 16. Left column **Substance**—Paper Size 10¼ × 4¾ inches. Sheets—195 Lines—10 or 11 to a Page. Script—Devanāgarī. No. of Granthas—1000. Author—Caṇḍapācārya Second and third Praśnas—incomplete

Beginning:

श्रीगणेशाय नमः ॥

कर्मब्रह्माध्वनीनस्य मन्त्री भूपतिभूपतेः ।
व्याचष्टे चौण्डपाचार्यः सामिधेन्यादिसत्क्रियाम् ॥

अत्र वक्ष्यमाणसामिधेन्यनुवचनादि तावद्धौत्रं होतृकर्मत्वात्तत्रैष्टिकं पाशुकं हौत्रद्वयमाश्वलायनमापस्तम्बीयञ्च ॥ तथा हि ॥ ऋग्वेदेन होता करोति ऋग्यजुर्वेदाभ्यां दर्शपूर्णमासावित्याचार्यवचनात् । ऋग्वेदे तन्मन्त्राणामाम्नानादाश्वलायनेन सूत्रे तत्प्रतिपादनाच्चाश्वलायनं तावदेकं यथा यजुर्वेदे वा वैनर्चनेत्यादिब्राह्मणे तद्विधानात्मन्यं प्रपद्य इत्यादिप्रश्नद्वये तन्मन्त्राणामाम्नानादाचार्येण प्रवरानन्तरं तत्प्रतिपादनादापस्तम्बीयञ्चापरम् । अतो विकल्पेन द्वयोरनुष्ठेयत्वाद्यथादृतभेदमुभयं प्रतिपाद्यते ॥

End and colophon—Same as No 2018

Subject: Āpastambaśrautasūtravyākhyā, otherwise known as Prayogaratnamālā. Second and third Praśnas.

Remarks:—The Ms is in good condition It begins with the text from the fourth paṭala of the Second Praśna. Hence it might be a continuation of 2050 Dr. Burnell observes that this is an independent Ms but inferior to No. 2048.

॥ आपस्तम्बश्रौतसूत्रव्याख्या ॥

2052. ĀPASTAMBAŚRAUTASŪTRAVYĀKHYĀ.

Burnell's Catalogue No. 3853. Page 15. Right column Substance—Paper Size—11¾ × 1¼ inches. Sheets—40. Lines—12 to a Page. Script—Devanāgarī No. of Granthas—950. Author—Dhūrtasvāmin. Paribhāṣāvyākhyā only

Beginning

श्रीयज्ञेश्वराय नमः ॥ ॐ यज्ञं व्याख्यास्यामः ॥

अत्रायं सूत्रारम्भहेतुः । नित्ययज्ञक्रिया पुरुषश्रेयोऽभिव्यनक्ति । तस्यैवाक्रिया[यां] प्रत्यवायमापादयति । ऋणश्रुतेराक्रियायां प्रायश्चित्तविधानाच्च ये चान्ये आश्रमा ऊर्ध्वरेतसां ते च नित्यश्रुतिविरोधादनधिकृतान्धपङ्ग्वादिविषयतया व्याख्येयाः । एवमवश्यमनुष्ठेयो यज्ञः श्रुत्यर्थस्यासर्वज्ञागम्यत्वेन शाखान्तरविध्युपसंहाराशक्तेश्चाव्याख्यातोऽनुष्ठातुमशक्य इति करुणाविष्टहृदयतया धर्मकथनाय तत्तच्छ्रेयोऽ(र्थि)तया यज्ञं व्याचिकीर्षुराचार्यः प्रतिजज्ञे— यज्ञं व्याख्यास्याम इति । देवतां प्रति स्वद्रव्यस्योत्सर्जनं यज्ञः । यज्ञ इत्येकविंशतिसंस्थो यज्ञो जात्यभिधानेन व्यपदिश्यते । सप्त सोमसंस्थाः, सप्त हविर्यज्ञसंस्था । सप्त पाकसंस्था इति । तत्राग्निष्टोमोऽत्यग्निष्टोम

उक्थ्यः षोडशी वाजपेयोऽतिरात्रोऽप्तोर्याम इति(सप्त) सोमसंस्थाः । आग्नेहोत्रं दर्शपूर्णमासावाग्रयणं पिण्डपितृयज्ञश्चातुर्मास्यानि निरूढपशुबन्धः सौत्रामणिरिति सप्त हविर्यज्ञसंस्थाः । औपासनहोमो वैश्वदेवं पार्वणमष्टका मासिश्राद्धं सर्पबलिरीशानबलिरिति सप्त पाकयज्ञसंस्था इति । वी आङ् इत्येतावुपसर्गौ । उपसर्गश्च क्रियान्तरे वर्तमानमर्थान्तरमभिद्योतयति । यथा प्रतिष्ठित इति तामेव क्रियां विशेषयति । अत्र विशब्दो विस्तरार्थः अधिकृतायां शाखायां सङ्क्षेपतो विधानेन शाखान्तरस्थान् विधीनुपसंहृत्य विस्तरेणेत्यर्थः । आङ् बलवदर्थे, श्रुत्यर्थसंशये सिद्धान्तं बलवद्भिर्हेतुभिरुपपाद्येत्यर्थः । व्याख्यास्याम इति चक्षिङ्धातोर्व्यक्तवचनस्य कृतख्याजादेशस्य लि(ल्) ट्प्रत्ययोत्तमपुरुषबहुवचनान्तस्य रूपं व्यक्तं वक्ष्याम इत्यर्थः । एकविंशतिसंस्थं यज्ञं विस्तारेण शाखान्तरस्थान् विधीनुपसंहृत्य सिद्धान्तं बलवद्भिर्हेतुभिरुपपाद्य व्यक्तं वक्ष्याम इति पिण्डितार्थः ॥

End ·

अर्थायार्थायाग्निं प्रणयत्यपवृत्ते कर्मणि लौकिकः सम्पद्यते यथासमारूढे ।

अर्थायार्थाय प्रयोजनाय प्रयोजनायेत्यर्थः । अग्निरित्याहवनीयो विधीयते ।

❀ ❀ ❀

आपस्तम्बमत्या सर्वेषां धारणमेव भारद्वाजस्य हिरण्यकेशि(नः), आश्वलायनस्य तु सर्वत्राधानप्रभृति आधाना-

द्वादशरात्रमजस्रा अत्यन्तं तुगतश्रिय इति यदानुक्त(नक्त)मा-
हवनीयं धारयेदिति नक्तधारणं तदा होमद्वयार्थं प्रणेष्यामी-
ति सङ्कल्प्य प्रणयनं दक्षिणाग्नेः पुनरानयनमेवाहवनीय-
धारणवचनात् यथाममारूढ इति दृष्टान्तोपदेशोपपत्ते
कर्मण्यपि समारोपणं यजमानस्य मानसव्यापारपक्षे गार्ह-
पत्यागारं प्राक् ॥(?)

Colophon

इति धूर्तस्वामिकृतसामान्यसूत्रभाष्यं समाप्तिमगमत् ॥

Subject:- Āpastamba paribhāṣāsūtra Vyākhyā—a commentary on Paribhāṣāsūtras otherwise known as Sāmānya sūtras (i.e. the former part of the 24th Praśna of Āpastamba Śrautasūtras.)

Remarks:—The Ms. is in a very good condition. This work has already been printed in the Government Oriental Library Series, Mysore, by Mr. A. Mahādeva Śāstrin, who attributes the authorship of this work to Haradatta and says that Dhūrtasvāmin's authorship is restricted to the commentary on the first eighteen praśna only. But we have in this Ms. Dhūrtasvāmin's commentary on a portion of the 24th Praśna also. The readings of this Ms. are slightly different from those found in the printed Volume.

॥ आपस्तम्बश्रौतसूत्रव्याख्या ॥

2053. ĀPASTAMBAŚRAUTASŪTRAVYĀKHYĀ.

Burnell's Catalogue No. 3852. Page 15. Right column. **Substance**—Paper. Size—12¼ × 5 inches. Sheets—84. Lines—5 to 10 to a Page. Script—Devanāgarī. No. of Granthas—2500. Author—Karavindasvāmin. Śulba Sūtra Vyākhyā only.

Beginning

श्रीमहागणपतये नमः ॥

विहारयोगान्व्याख्यास्यामः ॥ श्रीगणेशाय नमः ॥

ॐ मित्येकाक्षराख्येयं वन्दे वाङ्मनपातिगम् ।
पश्यन्ति सूरयो यद्धि तद्विष्णोः परमं पदम् ॥ १ ॥

लक्ष्मीसहायमतसीकुसुमच्छविशाश्वतम् ।
ज्योतिर्मे हृदये भूयात्सदा राजीवलोचनम् ॥ २ ॥

आपस्तम्बाय मुनये नमो वेदार्थभूमये ।
यत्सूत्रमुक्तास्तिष्ठन्ति यज्ञाः श्रुतिकुमारिकाः ॥ ३ ॥

तच्छुल्बसूत्रव्याख्येयमक्षरार्थावबन्धिनी ।
करविन्दाधिपेनाभिधीयते भाष्यकृन्मते ॥ ४ ॥

यज्ञव्याख्याप्रतिज्ञां कुर्वता भगवताऽपस्तम्बेन व्याख्येयतया हविर्यज्ञाः सोमयज्ञाः पाकयज्ञाश्च प्रतिज्ञाताः व्याख्याताश्च । तत्र तावदैष्टिकसौमिकपाशुबन्धिकदार्विहोमिकाः समविषमधनुर्मण्डलचतुरश्रत्र्यश्रनानाश्रयो(?)गार्हपत्यायतनप्रभृति चित्यष्टकापर्यन्ता नियतपरिमाणा देशविशेषास्तत्र तत्रोक्तास्ते च विमातव्या इति च तद्धि मानं प्रति साधनभूतरज्ज्वादीनां साधनभूतस्यैतावती रज्जुरेतावती क्षेत्रस्य करणीति स्वरूपमात्रेण ज्ञातुमशक्यत्वात्तत्प्रतिपादनमवश्यं कर्तव्यमिति यज्ञव्याख्यानानन्तरं विहारयोगव्याख्या क्रियते ॥

विहार इति ॥ विहारो विहरणं योगस्तत्साधनम् । विहाराणां योगा विहारयोगास्तान्व्याख्यास्यामः प्रतिपा-

दयिष्यामः। विपूर्वो हरतिः क्रीडाप्रज्वलनबन्धनसंवरणविमानाद्यनेकार्थस्तत्क्रियाविशेषसम्बन्धादेव देशादिषु तत्र तत्रार्थे विहारव्यपदेशः। अत्र तु विमानवाची युजिश्च द्विविधः। समाधिवाची सम्बन्धवाची च। अत्र तु समाधिवाची वेद्यादेः। सम्यगवस्थानं समाधिः। ससमाधिरित्यत्र वक्ष्यते। युज्यन्ते एभिरिति योगाः। विहरणोपायभूतरज्वादयः। पृष्ठ्यान्तयोरित्यादिना विमातव्यस्य वेद्यादिक्षेत्रस्य श्रोण्यंसानां विविधसम्पादनावच्छेदो विहरणं तत्साधनभूतरज्ज्वादयो विहारभूतास्तान्व्याख्यास्यामः। व्याख्यानं नाम सति सन्देहे बलवता हेतुनोपपाद्य विवरणम्। यथा समचतुरश्रानुपपदत्वाच्छन्दस्य मानार्थेषु यथाकामीशब्दार्थस्य विशयित्वात्येवमादिकम्॥

End

एकविंशोऽग्निर्भवतीत्यश्वमेधे विज्ञायते। तत्र पुरुषाभ्यासो नारत्निप्रादेशानाꣳ सङ्ख्यासंयोगात्सङ्ख्यासंयोगात्॥

एक॥ प्रकृतौ सप्तविधौ वाचेति सप्तसङ्ख्यापृथक्त्वनिवेशिनी समानजातीयेषु पुरुषेष्वसंयुक्तः नारत्न्यादिषु॥

अरत्निप्रादेशास्ता अरत्निना दक्षिणत इत्यादिवाक्येन स्वरूपमात्रेण विहितानर्थसङ्ख्यया। अतः प्रकृतौ पुरुषाणामेव सङ्ख्यासंयोगात्॥

अश्वमेधेऽपि॥ एकविंशाग्नौ पुरुषाणामेव सङ्ख्यासंयोगो युक्त इति। अरत्निप्रादेशास्त्वनभ्यस्ता भवेयुः। पुरु-

षाभ्यासादनन्तरं अरत्निना दक्षिणत इति कुर्यादित्यर्थः । एतदुक्तं भवति। त्रिस्तावैकविंशप्रकारादयविधेः-(?)स्ताव एकविंशोऽग्निर्ब्राह्मणदर्शनात् । द्वादश दश वास्यां द्विरुक्तिः प्रभ(श्न)समाप्तिद्योतनार्था ॥

Colophon.

इति करविन्दस्वामिकृतौ शुल्बटीकायां
षष्ठ पटल. ॥

Subject. Āpastambaśrautasūtra Vyākhyā—a commentary on Āpastamba's Śulbasūtras only (1-21 Khaṇḍas) 1-6 Paṭalas of the 30th Praśna.

Remarks:—The Ms. is in a very good condition. Though this and the following four Mss. of Śulbasūtravyākhyā give only the Paṭala division of the text and of the commentary, the relation between the Paṭalas and Khaṇḍas of these Sūtras may be noted down, as follows:—

1st	Paṭala	=	1-3	Khaṇḍas.
2nd	,,	=	4—7	,,
3rd	,,	=	1-10	,,
4th	,,	=	11-14	,,
5th	,,	=	15-17	,,
6th	,,	=	18-21	,,

॥ आपस्तम्बश्रौतसूत्रव्याख्या ॥

2054. ĀPASTAMBAŚRAUTASŪTRAVYĀKHYĀ.

J. L. Collection No. 216. Substance—Paper. Size—9½ × 4 inches. Sheets—65 (sheets —17-66; 1-16, 19 and 20, 27-44 are missing). Lines—10 to a Page. Script—Devanāgarī.

No. of Granthas—1500. Author—Karavindasvāmin. Śulba sūtra Vyākhyā—incomplete

Beginning:

(समचतुरश्रं दीर्घचतुरश्रं० यथायोगमुपदध्यात् ॥ समचतुरश्रं द्विधा कृत्वा तस्यैकस्मिन्भागे + शेषस्य समच)तुरश्रकरणीं समां पार्श्वमानीं तावतीमुक्त[म] या तिर्यङ्मान्या समचतुरश्रं कृत्वा तत्र शेषं विभज्य तस्य शेषस्य यदधिकं स्यात् तद्यथायोगमुपदध्यात् । अधिकस्य यथा(वि)भागे कृते भागा एकैकशो वा संहत्य वा भागान्तरस्योपरि निधीयमानास्तद्विस्तारं व्याप्यान्योन्यसम्पृक्तास्तद्दीर्घं सम्पादयन्ति । तथा विभज्य सर्वशेषं भागान्तरस्योपरि निदध्यादिति ।

अयमर्थः ॥ समचतुरश्रं दीर्घचतुरश्रं चिकीर्षन् क्रियमाणस्य दीर्घस्य चिकीर्षितविस्तारप्रमाणया तिर्यङ्मान्या समचतुर(श्रमेकतोऽपच्छि)द्य शिष्टस्य पार्श्वमानीं तावतीं कृत्वा, तदधिकमेकधाऽनेकधा वा(भागं विभज्य ते) सर्वे भागा दीर्घ(चतुरश्रं यथा सम्पा)दयन्ति तथा सर्वशेषं भागान्तरस्योपर्युपदध्यात् ॥

End:

विज्ञायते च कङ्कचितं शीर्षण्वन्तं + यथाप्रकृत्यात्मविकारात् ॥

किञ्च विज्ञायते च इदं – कङ्च कङ्कचितं शीर्षण्वन्तं चिन्वीतेति श्रूयते । यदि बोधकप्राप्ता कङ्के शिरो विधत्ते तत्कथं ब्रूयाद्ब्राह्मणं कङ्कचितं शीर्षण्वन्तमिति ब्रूयात्

ए(वे)त्यर्थः । तस्मादशिरस्कः श्येन. कङ्के शिरोविधानात् तथा वयोमात्रसादृश्यप्रकृते प्राप्ते श्येनप्राप्तिविधानसामर्थ्यादेव श्येने शिरोऽप्यस्तीति गम्यते। तत्रिवृते अग्ने शिर इत्यादिशिरस्युपधानदर्शनाच्च । अतस्तयोर्विकल्प इति मत्वा नोवा शब्दं ब्रूते । तत्र कङ्कश्येनोलज इति सङ्कल्पमात्रभेदः नाकारे दाक्षायणयज्ञादिवत्। अशिरस्कः श्येन इत्युच्यते प्रकृतौ वक्रौ विकारात्प्रकृतिवदेव पक्षौ वक्रौ पुच्छात्सन्नतं वक्रपक्षो श्यस्तपुच्छ इति विकारश्रवणात् आत्मा तु यथा प्रकृत्या यद्वा यथाप्रकृति यदिकृतं (अविकृतः) समचतुरश्रः चतुः पुरुष इत्यर्थः अ(विकारं न विकारं श्रूयते ॥)

Colophon : Sheet No. 59.

इति करविन्दस्वामिकृतायां शुल्ब(प्र)दीपिकायां पञ्चमः पटलः ॥

Subject Āpastambaśrauta Sūtra Vyākhyā—a commentary on Śulba Sūtras only 1-6 Paṭalas (3-21 Khaṇḍas). This commentary is also known as Āpastambaśulba pradīpikā.

Remarks:—The Ms is in a decaying condition This Ms. begins with the commentary on the sixteenth Sūtra of the first Paṭala and ends abruptly in the middle of that on the last twelfth Sūtra of the sixth Paṭala It is full of scriptorial errors.

॥ आपस्तम्बश्रौतसूत्रव्याख्या ॥

2055. ĀPASTAMBAŚRAUTASŪTRAVYĀKHYĀ.

Burnell's Catalogue No 3851 Page 15 Right column.

Substance—Paper Size—11½×5 inches. Sheets—50. Lines—10 or 11 to a Page Script—Devanāgarī. No. of Granthas—1150 Author—Kapardisvāmin. Śulba-sūtravyākhyā only.

Beginning :

श्रीगणेशाय नमः ॥

उक्ता यज्ञास्तेषामायतनानि नियतप्रमाणानि नियतदेशानि तेषामायामविस्तारान्वक्तुकाम आह ॥

विहारयोगान्व्याख्यास्यामः ॥ विह्रियन्तेऽस्मिन्नग्नय इति विहाराः प्राग्वंशादयः गार्हपत्यादयश्च ॥ युज्यतेऽनेनेति योगो रज्जुविशेषः । विहाराणां योगो विहारयोगः । विहारसम्पादनार्थान् रज्जुविशेषान् व्याख्यास्यामः प्रतिपादयामः । अथवा आयामादीनां विहरणमेव विहारस्तेषां योगो विहारयोगः सम्यक्सम्पादनमित्यर्थः । योगा इति बहुवचनं बहुव्रीहिः(?) प्रकारैर्दर्शयितुं, दर्शनञ्च प्राधान्यप्रतिपत्त्यर्थम् । यथा रथादयो न नियताङ्गप्रमाणा एकस्मिन्नङ्गेऽपि मात्रया हीयमाने सम्यङ्न गच्छन्ति, एवमन्यायतनादीन्यपि मात्रया हि(ही)नानि साधनभावं न गच्छन्ति । तस्माद्यत्नेन सम्पादयनीयानि । सर्वत्र विज्ञायत इति श्रुतीनामुपन्यासात्सर्वथा आयामादय उक्तैरेव मार्गैः सम्यक्सम्पादनीयाः । आयतमानां श्रेषे च प्रायश्चित्तेन भवितव्यम् । अमुमेवार्थं पृथग्दर्शयितुं शुल्वान्तरे 'अथातः' शब्दौ प्रयुक्तौ—'अथातो विहारयोगा' निति । आदिनस्तावद्विहां ग्रहणं वक्तव्यमनेनाचार्येण नोक्तं कल्पान्तरतो ग्राह्यम् ॥

End :

॥ एकविंशोऽग्निर्भवतीत्यश्वमेधे विज्ञायते ॥ गतमेतत् ॥ तत्र पुरुषाभ्यासो नारत्निप्रादेशानां ॥ कुतः । सङ्ख्यायोगात् ॥ एकविंश इति । ननु सप्तविध इत्यत्रापि सङ्ख्यैव विधीयते । वाक्यान्तरेण तत्रारत्निप्रादेशा निविशन्ते । न तत्र सप्तसङ्ख्यासंयोगः । पुरुषाभ्यास एव नारत्निप्रादेशानाम् । तत्र श्लोकः —

'विधे नरः...प्रोक्तं त्रिस्तावति विभावसो ।
एकविंशे ततो न्यूनं तिलानाञ्चैव सप्तभिः ॥'

द्विरुक्तिर्मङ्गलार्था ॥

Colophon :

षष्ठः पटलः ॥

इत्यापस्तम्बीयशुल्बभाष्यं कपर्दिस्वामिकृत सम्पूर्णम् ॥

जयसंवत्सर आश्वी(श्वयु)जशुद्धचतुर्थीचन्द्रवारे सम्पूर्णम् ॥

Subject : Apastambaśrautasūtravyākhyā—a commentary on Śulasūtras only. 1—6 Paṭalas of the 30th Praśna

Remarks—The Ms is in a very good condition The Ms is dated Monday—fourth day after the New Moon—in Āśvayuja month in Java year which corresponds to Śaka 1756 or 1834 A. D.

॥ आपस्तम्बश्रौतसूत्रव्याख्या ॥

2056. ĀPASTAMBAŚRAUTASŪTRAVYĀKHYĀ.

Burnell's Catalogue No. 9160 a. Page 16. Left column. Substance—Palm leaf. Size—16 × 1¼ inches. Leaves—66 (1-66). Lines—5 or 6 to a Page. Script—Grantha. No.

of Granthas—1100. Author—Sundararāja. Śulbasūtra-vyākhyā only.

Beginning:

श्रीमहागणपतये नमः ॥

आपस्तम्बेन योऽयं व्यरचि भगवता शुल्बसंज्ञो गभीरः
प्रश्नोऽर्थस्त(र्थन्त)स्य भाष्यप्रभृतिषु कथितं वीक्ष्य कृत्स्नं प्रयोगम् ।
संक्षिप्योद्बोधनार्थं कुशिककुलनिधेर्माधवार्यस्य यष्टुः
पुत्रः शुल्बप्रदीपं विवरणमधुना सुन्दरो निर्मिमीते ॥

सूत्रम् ॥ विहारयोगान्व्याख्यास्यामः ॥

टीका ॥ विहारो विहरणम् । चतुरश्रादिरूपेण भूमेः करणम् । तस्य योगा उपायाः ॥

End:

सूत्रम् ॥ एकविंशो भवतीत्यश्वमेधे विज्ञायते ॥

टीका ॥ शाखान्तरे एकविंशतिपुरुषपरिमाणमित्येकविंशतिकः स्तोमे तद्विधिः पञ्चदशार्धार्ध इत्यत्रोपाधेः प्रायिकत्वादस्तोमेऽपि ॥

सूत्रम् ॥ तत्र पुरुषाभ्यासो नारत्निप्रादेशानां सङ्ख्यासंयोगात्सङ्ख्यासंयोगात् ॥

टीका ॥ अस्मिन्पक्षेऽर्धद्वाविंशाः ॥ पुरुषाग्रिः । तत्र द्वे शते तिस्रश्चाङ्गुलयः । षट् च तिलाः पुरुषस्थानीयो वेणुस्तस्य चतुर्थपञ्चमषष्ठ....दशमाणूकारत्निर्वस्थप्रादेशा अवगन्तव्याः ॥ अरत्निप्रादेशाभावेऽपीति पक्षद्वयेऽप्येकविंशतिरेव पुरुषाः । श्रीमद्रामायणेऽप्यष्टादशपुरुषत्वमश्वमेधाग्रेदृश्यते ॥ श्लोकः :—

'स चिन्त्यो राजसिंहस्य सञ्चितः कुशलैर्द्विजैः ।
गरुडो रुक्मपक्षो वै त्रिगुणोऽष्टादशात्मकः ॥'

स तु शाखान्तरेण षड्विधस्यापि प्रकृतित्वदर्शनात् तत्रिस्तावोऽवगन्तव्यः ॥ उक्तं हि षड्विधस्यापि प्रकृतित्वं बोधायनेन–'षड्विधं वा सप्तविधं वा द्वादशविधं वा चेष्यमाण' इत्यत्र । त्रयोदशविधांस्तानग्नींश्चित्वाऽश्वमेधमारभते ततः परमग्निं चित्वा ततो द्वाविंशत्यादिविधमेव चिन्वीत । न तु पूर्वविधं न ज्यायांसं चित्वा कनीयांसं चिन्वीतेति । अथ यो द्वाविंशतिविधादूर्ध्वमपि विधामभ्यस्य ततः परमश्वमेधमारभते यथा त्रिंशद्विधान्ते तस्याप्यश्वमेधाग्निस्त्रिस्ताव एकविंशो वा तस्य प्रकारान्तराभावात् । ततः परन्तु पूर्वकृतादारभ्यैकत्रिंशादिविधमेव चिन्वीत पूर्वेषां कृतत्वात् । व्यञ्जितञ्चैतद्बोधायनेन । अश्वमेधं प्राप्तश्चेदाहरेत् अत ऊर्ध्वा(र्ध्वा?)मभ्यसेत् नेतरदाद्रीयेतातीतश्चेदाहरेदाहृत्य कृतान्तादेव प्रत्याददीतेति सिद्धम् ॥

Colophon.

इति सुन्दरराजीये शुल्बावबरणे शुल्बप्रदीपे
षष्ठः पटलः ॥

विजयनामसंवत्सर आषाढशुद्धपञ्चम्यामापस्तम्बशुल्बव्याख्यानं
सम्पूर्णम् ॥

श्रीगुरुभ्यो नमः ॥ श्रीयज्ञेश्वराय नमः ॥

सुन्दरराजबुधेन्द्रो व्याचख्यावग्निसूत्रषट्पटलीम् ।
वेङ्कटपतिरलिखत्तामरुणाचलदीक्षितात्मजमुदेऽसौ ॥

Subject: Āpastambaśruatasūtravyākhyā, otherwise known as Śulba Pradīpa—a commentary on Śulbasūtras or Agnisūtras. 1—6 Paṭalas of the 30th Praśna.

Remarks — The Ms is in a very good condition The other work contained herein is बोधायनशुल्बसूत्रदीपिका by Dvārakanātha yajvan

The author of this commentary is Sundararāja, son of Mādhavārya yajvan of Kuśika family. The scribe of this Ms. is Venkaṭapati, who copied it down to please the son of one Aruṇācala Dīkṣit.

॥ आपस्तम्बश्रौतसूत्रव्याख्या

2057. ĀPASTAMBAŚRAUTASŪTRAVYĀKHYĀ.

Burnell's Catalogue No 9172 (j) Page 25 Right column Substance—Palm Leaf Size—16 × 1¼ inches Leaves—26 (86-111). Lines—8 to 10 to a Page Script—Grantha. No of Granthas—1100 Author—Sundararāja Complete.

Beginning, end, colophon and subject—Same as No. 2056.

Remarks —The Ms is in a decaying condition Some leaves are broken out and some are rat-eaten Dr. Burnell observes about this Ms. on page 25 b as follows:—

"(This Ms)—153 leaves—(contains) Āpastamba Cayana pravoga and extracts from Sundararāja's commentary on the Śūlba Sūtra. (It is) written about 1700".

As the leaves of this Ms had originally been ill-arranged, Dr Burnell could not have traced out its full contents. The leaves are now fully arranged with great care and labour, as the following table of the contents and the number of leaves in this Ms. will show.—

1	आपस्तम्बसूत्रप्रयोगवृत्तिः ॥	LL	1—42
2	नक्षत्रेष्टिप्रयोगः ॥	.	42—57
3	प्रकीर्णकारिकागतकम् ॥		58—61
4	मित्रविन्देष्टिप्रयोग ॥	..	62 & 63
5	आपस्तम्बसूत्रप्रयोगवृत्ति ।	.	63—72
6	मृगारेष्टिप्रयोग ।	..	72—76
7	पवित्रेष्टिप्रयोगः ॥	,	76—78
8	पौण्डरीकप्रयोगः and कारिका ॥		78—80
9	सर्वतोमुखप्रयोग ॥	..	80—86
10	आपस्तम्बशुल्बप्रदीपः ॥		86—111
11	जातकफलवर्णनम् ।	..	1—18
12	Fragments(?)	..	1

बोधायनश्रौतसूत्रव्याख्या

2058. BODHĀYANAŚRAUTASŪTRAVYĀKHYĀ.

Burnell's Catalogue No 3744 Page 18 Right column Substance—Paper Size—11½ × 4 inches Sheets—347 Lines—7 to a Page Script—Devanāgarī No of Granthas—5000 Author- Bhavasvāmin First Nineteen Prasnas.

Beginning

श्रीगणेशाय नमः ॥

ब्राह्मणानां बहुत्वादेकैकस्यां शाखायां परिसमाप्तत्वा-दर्थस्य च दुर्बोधत्वादसार्वज्ञजन्यत्वाच्च संहृत्य विवरणार्थं सुखं बुध्वा कर्माण्यनुष्ठाय फलं सर्वे प्राप्नुयुरिति कल्प

आरब्ध आचार्येण। वाक्यसम्बन्धश्च गर्भाधानादिसंस्कारैः संस्कृतोऽधीत्य वेदान्न्यायतः कृतदार आहिताग्निरामावास्येनेति चोदितस्य कर्मणोऽधिकारी। तानि च कर्माणि नानाविधानि। तत्र दर्शपूर्णमासाग्निहोत्रज्योतिष्टोमप्रवर्ग्याण्यपूर्वाणि। तत्र दर्शपूर्णमासविकारा इष्टयोऽग्नीषोमीयः पशुः, ज्योतिष्टोमविकारा एकाहद्वादशाहाश्च। अग्निहोत्रं न प्रकृतिः। प्रकृतं(तिः) नाम सर्वधर्माणामतिदेशकं। प्रवर्ग्याधाने कुण्डपायिनामयनेषु प्रवर्ग्याश्च न प्रकृतिः दधिधर्मे धर्मातिदेशं केचिदिच्छन्ति परिश्रित्योभयत्र शान्तिं कृत्वेति। दर्शपूर्णमासज्योतिष्टोमौ प्रकृती एव। अग्नीषोमीयद्वादशाहसंवत्सरादयः प्रकृतिविकृतयः। इष्टय एकाहाश्चोद्भिदादयो विकृतयः एव। दर्विहोमादयो न प्रकृतयो न विकृतयः। 'आमावास्येन वा पौर्णमासेन वा हविषा यक्ष्यमाणो भवती'ति दर्शपूर्णमासारम्भो मन्त्रक्रमान्निरपेक्षत्वादाधानादीनां साङ्गानां समस्तविधानाभावादेतदपेक्षत्वाच्चानयोर्ज्ञाने तेषां गतकल्पत्वात्। इह पौर्णमास्यादित्वेपि अमावास्यायाः प्रथममन्त्रग्रहणमन्त्रक्रमात् दाक्षा(यण)यज्ञादौ शाखाहरणाद्यारम्भस्य पौर्णमास्यामप्युपकारात् पौर्णमासीधर्मारम्भे क्वचिदप्यामावास्यस्यानुपकारादसाधारणा(ण्या?)दादिपदार्थस्य 'अथातो दर्शपूर्णमासौ व्याख्यास्याम' इत्यप्रतिज्ञातमारम्भादेव गम्यते इति। अथेत्यधिकारकरणं। तयोरेवारम्भाच्छ्रुतश्च कालप्रकृतेस्तस्येदमिति वा भवार्थे वा विध्यपेक्षः ४

End :

सवनीयेष्वयं विशेषः प्रतिप्रस्थातः पशू अन्तिके-
स्तां पशवोऽन्तिके सन्तु अर्वाग्वा परैरविदं परोवरैस्तौ वां
जुषे अर्वाग्वा परैरविदं परोवरौस्तान्वो जुषे दिवमग्राभ्यां
मा लेखिष्ठ ममैमालिखिष्ठ मध्याभ्यां मध्यैमाहिंसिष्ठ मा-
हि॰सिष्ठस्त्रिः या जुष्टामुपाकरोति ॥

* * * *

त्रिस्त्रिः प्रच्युतयोः पशुहृदये उत्तमे कुरुतात्
शमितहृदयानि जिह्वा वक्षांसि तानि तानीत्यादि तानि
मव्यानि दोष्यैकचराणि नानापार्श्वाणि दक्षिणा श्रीरध्यु-
र्धिदक्षिणानि दोंषि मव्या श्रोणिरणिमन्ति उदानांवनि-
ष्टूश्वजाघनीश्चावथंतान् (?) त्रिस्त्रिः पशून्पशूनां प्रच्युतानां
हृदयान्युत्तमानि पश्वो संवदम्व पशुषु दिवं वां भस्मना
प्रणेथां दिवं वः भस्मना प्रणध्वं शुचौ स्थस्त(?)मभिशोचतं
शुचस्थ(?) तमभिशोचत मह्यं यजमानाय तिष्ठतं(?) तिष्ठत ॥

Colophon

इति भवस्वामिकृते कल्पविवरणे तृतीयो
द्वितीयोऽध्यायः ॥ श्रीरस्तु ॥

भोसलकुलभूपछायावासिना उरगीत्युपनाम्ना लेखकेन लिखितम् ॥

Subject Bodhāyana Śrauta sūtra vyākhyā, otherwise known as Kalpavivaraṇa, a commentary on these sūtras belonging to Black Yajur Veda. This Ms contains the commentary on the first nineteen Praśnas only.

This Ms adopts the division into Praśnas and Adhyāyas, as follows —

1	दर्शपूर्णमासौ	Praśna	I	Adhyāyas	17
2	अग्न्याधानम्	,,	II (II)	,,	1
3	Do.	,,	III	,,	2
4	अग्निहोत्रम् (दशाध्यायी)	,,	IV (III)	,,	10
5	पशुबन्धः	,,	V (IV)	,,	4
6	चातुर्मास्यम्	,,	VI (V)	,,	7 (6)
7	प्रवर्ग्य	,,	VII (IX)	,,	6
8	अग्निष्टोमः प्रातस्सवनम्	,,	VIII (VI)	,,	10
9	,, ,,	,,	IX (VII)	,,	5
10	,, माध्यन्दिनसवनम्	,,	X	,,	2
11	,, तृतीयसवनम्		XI (VIII)	,,	2 (6)
12	,, यज्ञपुच्छम्		XII	,,	2
13	,, Do.	,,	XIII	,,	1
14	अग्निचयनम्	,,	XIV (X)	,,	19
15	वाजपेयः	,,	XV (XI)	,,	5
16	राजसूयः	,,	XVI (XII)	,,	6
17	काम्येष्टयः	,,	XVII (XIII)	,,	13
18	औपानुवाक्यः	,,	XVIII (XIV)	,,	12
19	एकादशिनी	,,	XIX (XVII)	,,	2

Remarks —The Ms. is in a very good condition It is full of scriptorial errors The nick-name of the scribe of this Ms. is Uragiti. The number of Praśnas given in the above table is based on the order of the Praśnas preserved in this Ms., while the number given within brackets is according to the Printed Volume of Bodhāyana Sūtras

Regarding the Bodhāyana Sūtras and their commentaries

Dr. Burnell observes thus on page 20 of his Catalogue :—

"The Baudhāyanasūtra is very simple in its form; a comparison between the Baudhāyana and Āpastamba Śrautasūtras shows very conclusively that the growth of the sūtra style was gradual, and that the most artistic sūtras are the latest of the period when that style prevailed.

"Unfortunately Mss. of the Baudhāyana Sūtras and commentaries are rare and all incomplete. Some of them have been described by me already (Catalogue, pp. 74 to ; and for others see "Notices" in pp. 164, 180, and 270). See pp. 184 fg. of Bühler's Gujarat Catalogue, etc., and pp. 8-10 of Kielhorn's Catalogue of the Mss. in the southern division of the Bombay Presidency. The Gṛhya section is perhaps not to be found in S. India in good Mss. During many years search I have been unable to meet with a Ms. that could be satisfactorily identified, but only with fragments of questionable authenticity. The reason of this is that Vedic rites are now very rarely performed except in a most perfunctory manner and that the few priests who even profess to know anything of them profess to perform rites according to rituals of which they are ignorant, in order to increase their gains. Thus the Āpastamba ritual with a few arbitrary changes serves for the Baudhāyana, Bhāradvāja, etc. rituals, which do not really exist.

"There are several commentaries on the Baudhāyanasūtras (Weber, Literaturgeschichte, P. 111) by Bhavasvāmin (see above), Anantadeva, Nivahasta, Śesa, Dvārakānātha, and Sāyaṇa. The only Ms. of the last as yet discovered is mentioned by Kielhorn (Catalogue of Mss. in the Southern part of Bombay Presidency, p. 8); it is of great interest, as Sāyaṇa

himself says that he followed this Sūtra and it is certain to be a complete and valuable commentary."

॥ बोधायनश्रौतसूत्रव्याख्या ॥

2059. BODHĀYANAŚRAUTASŪTRAVYĀKHYĀ.

J. L. Collection No. 217. Substance—Paper. Size—10¾ × 4¼ inches. Sheet—134 (1-6, 12-57, 113-224). Lines—8 to a Page. Script—Devanāgarī. No. of Granthas—2150. Author—Sāyanācārya. First Praśna—incomplete.

Beginning

श्रीगणेशाय नमः हरिः ॐ

वागीशाद्यास्सुमनसः सर्वार्थानामुपक्रमे ।
यन्नत्वा कृतकृत्यास्स्युस्तन्नमामि गजाननम् ॥ १ ॥

त्रयीमङ्गत्रयीकल्पलतायां यन्निरूपितम् ।
दोहनं श्रियमादत्ते मीमांसासङ्गहद्वयम् ॥ २ ॥

यस्सायणाचार्यपदाभिषिक्तः
श्रीशङ्कराचार्यसुताग्रगण्यः ।
प्रसन्नगम्भीरमतिस्स्फुटार्थं
बौधायनं कल्पमधो विधास्यन् ॥ ३ ॥

व्याख्याय विद्यास्थानानि पुराणादीनि साम्प्रतम् ।
व्याचष्टे सायणाचार्यः कल्पं बौधायनं सुधीः ॥ ४ ॥

पूर्वव्याख्याप्रमेयार्थाः स्पष्टा इत्यनिरूपिताः ।
अप्रबुद्धप्रबोधार्थं निरूपयति तानपि ॥ ५ ॥

अनुष्ठानविकल्पाश्च करणादौ(?) ये व्यवस्थिताः ।

सम्यक् तेऽपि निरूप्यन्ते पूर्वकल्पे यथोचितम् ॥ ६ ॥

तत्र तावद्विध्यर्थवादमन्त्रात्मना त्रिधा व्यवस्थितो वेदराशिः । तस्य च कर्मावबोधनमेवार्थः । तदधीतमेव कर्माभ्युदयहेतुः । तथा चोक्तं -'दृष्टो हि तस्यार्थः कर्मावबोधनं नाम । न च तत्राप्य(प्या)ध्ययनमात्रान्मन्त्रमनुभवन्तो(मात्रात्तत्र भवन्तो) याज्ञिकाः फलं समामनन्ती'ति । विधिविहितमर्थवादप्रशोचितं मन्त्रेण स्मृतमभ्युदयकारि भवतीति । ततश्च चोदितानां कर्मणां सुखावबोधाय भगवान् बोधायनः कल्पमकल्पयत् । यतो ब्राह्मणानामानन्त्यं दुरवबोधता च अतो न तैः सुखं कर्मावबोध इति कल्पसूत्राणीमानि(नि) प्रतिनियतशाखान्तरान(ण्य)ङ्गीचक्रुः पूर्वाचार्याः । अत एवाध्ययनविध्याक्षिप्तमध्येतव्यत्वात्तदुपबृंहणविशेषैरुपबृंहितस्य कल्पस्य वैशद्यलाघवकार्यस्यप्रकरणशुद्ध्यादिभिः प्रकर्षेणुक्तस्य तत्तन्मार्गानुसारिभिः स्वानुष्ठेयकर्मावबोधनार्थमध्ययनं सिद्धम् । एतदेवाभिसन्धायोक्तं कर्मान्ते—'पञ्चतयेन कल्पमवेक्षेत छन्दसा ब्राह्मणेन प्रत्ययेन न्यायेन सिद्धिवशेने'ति । कल्प्यत इति कल्पः प्रयोगः । सोऽत्र निरूप्यत इत्ययं ग्रन्थोऽपि कल्पः ।

* * * *

तत्र प्रत्यक्षश्रुतिमूलतया हविर्यज्ञेषु सर्वेष्टिप्रकृतितया मन्त्राम्नानात्कर्मानुरोधाच्च प्रथमं दर्शपूर्णमासौ निरूपयति—आमावास्येन वेत्यादिना ॥ ननु सर्वक्रतूनामग्नयः

सकृदाहिता इत्यग्न्याधानसंस्कारादेवाग्निसिद्धिः । तत्रापि 'नक्तं गार्हपत्यमादधाति अर्धोदिते सूर्ये आहवनीयमादधाती'त्यादि तदितिकर्तव्यताविशेषादेवाहवनीयत्वादिसिद्धिः । तेनाधानमेवाग्न्युत्पादकं । ते चाग्नयः सर्वक्रत्वङ्गभूताः यथोपनयनसंस्कृताधीतमन्त्राः । अत एवानुष्ठानेऽप्याधानस्य प्राथम्यं नियतं तत्कृतः तदतिक्रमेण दर्शपूर्णमासयोः प्रागभिधानमिति । सत्यम्, तथापि अग्न्याधानप्रभृतीन्यपि वैतानिकानि । दर्शपूर्णमासौ तु पूर्वं व्याख्यास्यामः ॥ तन्त्रस्य तत्राम्नानत्वादिति ।

Ent :

यदस्मिन्कर्मणि० । अवमन्तां घृतेन स्वाहा देवेभ्य इदं । यदस्य कर्मणोत्यरीरिचं० । समर्धयित्र स्वाहा । अग्नये स्विष्टकृत इदं । प्रजापते न त्वदेतां० । स्वाहा प्रजापतय इदं धौवात । स्रुवेणोपहत्य ब्रह्म प्रतिष्ठा मनस इत्येतेनानुवाकेन प्रतिमन्त्र जुहोति... ....॥

Colophon (Sheet No 58)

इति प्रथमप्रश्ने तृतीयोऽध्यायः ॥

Subject Bodhāyana Śrautasūtra vyākhyā on 1-17 Khaṇḍas of the First Praśna

Remarks. -The Ms is in a decaying condition Many sheets in the middle and end are completely eaten by white ants.

॥ बोधायनश्रौतसूत्रव्याख्या ॥

2060. BODHĀYANAŚRAUTASŪTRAVYĀKHYĀ

Burnell's Catalogue No 9165 Page 19. Left column.

Substance—Palm leaf (Śrītāla) Size—10½ × 3 inches. Leaves—285 (1-98, 19, 33, 41 and 64) Lines—14 or 15 to a Page Script—Grantha No. of Granthas—19,950 Author—Mahādevavājapeyin Incomplete

Beginning

हरिः ॐ

स जयति कुञ्जरवदनो
देवो यत्पादपङ्कजस्मरणम् ।
वासरमणिरिव तमसां
राशिं नाशयति विघ्नानाम् । १ ॥

दृष्टेर्वृष्टिरुदेति वृष्ट्युपचयादन्नानि तेभ्यः प्रजाः
ताभ्यो यज्ञसमुद्भवः पुनरिति प्रक्रान्तचक्रक्रमः ।
अत्रामुत्रसमीहितार्थघटनाबद्धव्रतो यो जग-
ज्जन्मस्थेमलयोत्सवस्स दिशतु श्रेयांसि यज्ञेश्वरः ॥ २ ॥

वेदोदधेर्विनिर्मथ्य योऽदात्कल्पाभिधां सुधाम् ।
विबुधेभ्यो नमस्तस्मै बोधायनमहर्षये । ३ ॥

बोधायनाय मुनये मुनिभङ्गादृताङ्घ्रये ।
कामा(कर्मा(?))म्बुधिं तितीर्षूणां कल्पनौकाकृते नमः ॥ ४ ॥

अस्ति बौधायनं सूत्रमाद्यमाध्वर्यवाश्रयम् ।
अधीतिबोधाचरणप्रचारैस्तत्प्रपञ्चयन ॥ ५ ॥

भारद्वाजान्वयाम्बोधिसुधांशुम्मत्सु सम्मत ।
त्रियम्बकाध्वरी लोके त्रय्यन्तज्ञस्समेधते ॥ ६ ॥

तदध्वर्युमहादेववाजपेयी तदाज्ञया ।
बोधायनोक्तकर्मान्तद्वैधकल्पानुसारतः । ७

वैतानिकानां यज्ञानां भवस्वामिमतानुगाम् ।
कर्माध्वगानां सुगमां करोति श्रौतचन्द्रिकाम् ॥ ८ ॥

अत्र धर्मस्य प्रतिपाद्यत्वात्तत्स्वरूपं तत्प्रमाणं तदधिकार्यादि च निरूप्यते। 'चोदनालक्षणोऽर्थो धर्म' इति जैमिनिः । विधिप्रमाणकश्रेयस्साधनताको धर्म इत्यर्थः । कर्मजन्योऽभ्युदयनिश्श्रेयसहेतुरपूर्वाख्यात्मगुणो धर्म इति हरदत्तः । अभ्युदयः स्वर्गपशुपुत्रादिः । निश्श्रेयसं मोक्षः । एतदुभयविधश्रेयस्साधनं धर्म इत्यर्थः । अत्र मनुनाप्युक्तम्—

विद्वद्भिः सेवितस्सद्भिर्नित्यमद्वेषरागिभिः ।
हृदयेनाभ्यनुज्ञातो यस्तं धर्मं व्यवस्यते ॥ इति ॥

* * * *

अथोपोद्घाते कल्पभाष्येऽत्र दर्शपूर्णमासाग्निहोत्रज्योतिष्टोमप्रवर्ग्याण्यपूर्वाणि । 'तत्र दर्शपूर्णमासविकारः इष्टयोऽग्नीषोमीयश्च पशुः, ज्योतिष्टोमविकारा एकाहाः द्वादशाहश्च, अग्निहोत्रञ्च प्रकृतिः । प्रकृतिनाम्ना धर्मातिदेशकः । प्रवर्ग्याधानकुण्डपायिनामयनेषु प्रवर्ग्याश्च न प्रकृतिः। दधिधर्मे धर्मातिदेशं केचिदिच्छन्ति। परिशृत्वो(?)भयतश्शान्तिं कृत्वेति वचनात् । दर्शपूर्णमासज्योतिष्टोमौ प्रकृतिरेव । अग्नीषोमीयद्वादशाहसांवत्सरादयः प्रकृतयो विकृतयश्च । इष्टय एकाहा उद्भिदादयो विकृतय एव । दर्विहोमादयो न प्रकृतयो न विकृतय इति ' इत्युपोद्घातः॥

' आमावास्येन वा पौर्णमास्येन वा हविषा

यक्ष्यमाणो भवति स पुरस्तादेव हविरातञ्चन-
मुपकल्पयत' इति ॥

अमावास्याया इदं अमावास्यायां भवं वा आमावास्यं कर्म । एवं पौर्णमासमिति । हविःपदञ्च हविस्साध्यं अमावास्यापौर्णमासीसम्बन्धियागसमुदायद्वयं लक्षयति । आमावास्येन पौर्णमासेनेति पदद्वयसामानाधिकरण्यादमावास्यायां पौर्णमास्यां च सम्बन्धो भवनं विधिपूर्वकेऽनुष्ठाने सति भवति ॥

End

अत्र सर्व एवाग्निर्याजमान इति सिद्धे निश्चय इति वचनमिष्टकोपधानमात्रं याजमानं नेतरदुःखासम्भरणादीत्येवमर्थं तं वा एतं यजमान एव विचिन्वीतेति तत्रैव यजमानस्य कर्तृत्वावगमादिति भावः । सर्वमेवाग्न्याधेयछन्दो यजमानमग्न्याधेये । छन्दो मन्त्रः । अत्रापि प्रधानमन्त्रमात्रं भूर्भुवो धर्मश्शिरः इत्यादि याजमानं नेतरदित्येतदर्थमग्न्याधेयग्रहणं उद्धरणप्रभृतिविराजक्रमोपस्थानान्तं यजमानो वदेदिति तु केशवादयः ॥

Colophon. (Leaf No 98)

बौधायनकृतस्यासौ वृत्तिस्सूत्रस्य तायते ।
दर्शश्च पूर्णमासश्च सम्पूर्णं प्रीयतां शिव ॥
केयं बौधायनं सूत्रं क मेऽल्पविद्यया मति. ।
गुरो कटाक्षस्तनुते वृत्तिमेवं सुबोधिनीम् ॥

हरिः ॐ ॥

Subject: Bodhāyana Śrautasūtra Vṛtti otherwise known as Subodhinī and Śrauta Candrikā 1-6 (1-5) Praśnas.

This Ms. adopts the division of the text, as follows —

Praśna.		Paṭalas.	Khaṇḍas.
I	दर्शपूर्णमासौ ॥	1—17 Adhyāyas	1—36
II & III (II)	आधानम् ॥	1—6	1—21
IV (III)	दशाध्यायी (omitting पुनराधेय) ॥	2—7	1—16 & the beginning of the 17th).
V (IV)	पशुबन्ध. ॥	1—3	1—11 (incomplete)
VI (V)	चातुर्मास्यम् ॥	1—6	1—18 (incomplete)

Remarks —The Ms. is old and is in good condition. It contains broad leaves of Śītāla species. It breaks off in the commentary on the 18th Khaṇḍa of Cāturmāsya Praśna.

Regarding this author and this commentary, Dr. Burnell observes on page 19 of his Catalogue, as follows —" The author Mahādeva states that he was Adhvaryu to one Tryambakādhvarin (of Śahaji's time 1684-1710A. D.), by whose order he composed this commentary, following the opinions of Bhavasvāmin. This commentary is exceedingly diffuse, the Baudhāyana Karmānta and Dvaidha sūtras are discussed and quotations from the Āpastamba, Bhāradvāja and other Sūtras are frequent."

॥ बोधायनश्रौतसूत्रव्याख्या ॥

2061. BODHĀYANAŚRAUTASŪTRAVYĀKHYĀ

Burnell's Catalogue No. 9166 a. Page 19. Right column

Substance—Palm leaf Size—14½ × 2¼ inches Leaves —177) 1-73, 13, 26, 35) Lines —13-17 on Page Script —Grantha No of Granthas—19,950 Author—Mahādevavājapeyin First six Praśnas Incomplete

Beginning, end, colophon and Subject—Same as No 2066

Remarks—The Ms is in good condition The Ms contains the following works

1. बोधायनश्रौतसूत्रव्याख्या (सुबोधिनी) ॥
2. बोधायनगृह्यव्याख्या ॥
3. बोधायनपूर्वप्रयोग ॥
4. बोधायनापरप्रयोग ॥

॥ बोधायनश्रौतसूत्रव्याख्या ॥

2062. BODHĀYANAŚRAUTASŪTRAVYĀKHYĀ.

J L Collection No 218 Substance—Paper Size 10 × 4 inches Sheets—85 Lines—7 or 8 to a Page Script —Devanāgarī. No of Granthas 1650 Author—Mahādevavājapeyin Daśādhyāyī vyākhyā only—incomplete

Beginning:

श्रीमणिकर्णिकेश्वराय नम ॥

आधानं सविकारं सप्रपञ्चमुक्त्वा क्रमप्राप्तमग्निहोत्र-माह ॥

पुरादित्यस्यास्तमयाद्गार्हपत्यमुपसमाधायान्वा-हार्यपचनमाहृत्य ज्वलन्तमाहवनीयमुद्धरति सा-यमाहुतये पुरादित्यस्योदयाद्गार्हपत्यमुपसमाधा-यान्वाहार्यपचनमाहृत्य ज्वलन्तमाहवनीयमुद्धर-

ति प्रातराहुतय इति ॥

आदित्यस्यास्तमयात्पुरा अव्यवहितपूर्वकाले उत्सर्गेऽपराह्णे गार्हपत्यं प्रज्वाल्येत्याश्वलायनः। गार्हपत्यमुपसमाधाय प्रादुष्कृत्य अन्वाहार्यपचनमाहृत्य भिन्नयोनिन्वपक्षे आहरणमन्यतः अपि(वा) गार्हपत्यादिति पक्षे गार्हपत्यादेव ज्वलन्तमाहवनीयं। अत्र ज्वलन्तमिति लटो निर्देशादुद्धरणसमये अभिज्वलनमपेक्षितमिति द्रष्टव्यम्। उद्धरणं नाम औ(ऊ)र्ध्वदेशेन आहवनीयायतनं प्रतिहरणं उद्धरति सायमाहुतये। उद्धरतीत्येव सिद्धे सायमाहुतय इति यो यदर्थमुद्धृतस्स तस्यैवोपकरोति नान्यस्येति ज्ञापनार्थम् एवं प्रातराहुतय इत्यपि, तेनार्थायार्थाया(ऽ)ग्निं प्रणयतीति सूचितं भवति। यथा चैतत्तथोक्तं 'यस्मिन्होत्राहुतं सोऽग्निः कर्मान्तं तस्य धारण'मित्यपवृत्ते कर्मणि लौकिकः सम्पद्यत इत्यत्र। द्वैधे तु 'अग्नीनां विहरण' इति सूत्रं बोधायनस्याधानप्रभृत्येतेऽजस्रास्स्युरिति शालीकिरिति पक्षद्वयमुक्तं। व्याख्यातमेतदधस्ता'दपवृत्ते कर्मणि लौकिकः सम्पद्यत' इत्यत्र। आदित्यस्योदयात्पुरा अव्यवहितपूर्वकाले एवं प्रातर्व्युष्टायामित्याश्वलायनः। गार्हपत्यमित्यादि स्पष्टम् ॥

End.

तदुदित्वा वाचं यच्छत्या हविष्कृत इति। तद्धविरनुमन्त्रणं उदित्वा उक्त्वा वाचं यच्छति आ हविष्कृतः हविष्करणावधि तण्डुलप्रक्षालननिनयनपर्यन्तं प्रस्कन्दनपर्यन्तं वा। ननु ब्रह्मजपः प्रणेष्यामि यजमानवाचं यच्छेति सम्प्रेषणेव यजमानस्य वा(क्)नियमारम्भात् पुन-

रत्र विधानं व्यर्थमिति चेत्; न। निरूप्यमाणहविरनुमन्त्रणमन्त्रेण वाङ्नियमस्य विच्छेदाशङ्का स्यात् तन्माभूत्, पुनरप्याहविष्कृतो वाग्यमो यथा स्यादित्येवमर्थं तस्य विधानादिति। हविष्कृता वाचं विसृज्य यज्ञं योगेन यु(न)क्ति कस्त्वा युनक्ति स त्वा युनक्तीतीति हविष्कृता हविष्करणेन तण्डुलप्रक्षालननिनये(यने)न वा प्रस्कन्दनेन वा वाचं विसृज्य, यज्ञं योगेन, युज्यतेऽनेनेति योगो मन्त्रः तेन युनक्ति मन्त्रस्य जप एव योगः काले कपालानि युनक्ति यानि धर्मे कपालान्युपचिन्वन्ति वेधसः पुष्टण(पूष्ण)स्तान्यपि व्रत इन्द्रवायुर्यु(यू)गत्का(युङ्क्ता)मितीति ॥ कालेऽध्वर्युकर्तृकस्यार्थनानि योगेन युनक्ति यानि धर्मे इति विहितस्य कपालयोगस्य काले कपा(लानि)..... .... ॥

Colophon (Sheet No 82).

बोधायनकृते सूत्रे दशाध्याय्यामजा(य)त।
प्रवासोपस्थितेर्व्याख्या तया तुष्यन्तु सज्जना. ॥

इति बोधायनसूत्रव्याख्यायां सुबोधिन्यां दशाध्याय्यां षष्ठोऽध्यायः ॥

Subject: Bodhāyana śrauta sūtra vyākhyā, otherwise known as Subodhinī, a commentary on the Daśādhyāyī—fourth (third) Praśna—of the Bodhāyanaśrautasūtras.

Contents of this Ms are as follows.—

1	आग्रहात्रम्	Adhyāya	2	Sheet	1
2	अग्न्युपस्थानम्	,,	3	,,	30
3	पिण्डपितृयज्ञ.	,,	4	,,	40

4	आप्रयणम्	Adhyāya	5	Sheet	57
5	प्रवासोपस्थिति	,,	6	,,	72
6	अग्निभ्यः प्रवास	,,	7	,,	82

Remarks —The MS is in good condition

—

॥ बोधायनश्रौतसूत्रव्याख्या ॥

2063. BODHĀYANAŚRAUTASŪTRAVYĀKHYĀ.

Burnell's Catalogue No 9178(c) Page 21 Right column. Substance —Palm leaf Size —1 3 × 2 inches Leaves—148. Lines 10 or 11 to a Page Script—Grantha. No of Granthas —4400 Author Bālādīksita. Agniṣṭomavyākhyā —incomplete

Beginning·

॥ बोधायनाग्निष्टोमचन्द्रिका ॥

श्रीमहागणपतये नमः ॥

सौन्दर्योद्गारसीमा मरमगुणगणोत्सेधसङ्गाभिरामा
पार्श्वद्वन्द्वस्थरामा परशिवहृदयाम्भोजसूर्यांशुभूमा ।
सद्यस्सन्दिष्टकामा श्रुततातिषु दितेः पुत्रसङ्केति भीमा
पायात्सा देवता मा सकलसुरनुता देवसेनेशनामा ॥

श्रीमद्बोधायनाख्याम्बुधिगलितमहासूत्रपीयूषभागा
दत्ता यैस्संविविच्य स्फुटमिह सवने श्रीमहादेवसंज्ञैः ।
भूदेवेभ्यः प्रकामं मखशतमहितैः द्वैधकर्मान्तयुक्ता
संयुक्तौपानुवाक्याऽभवदमितगुणान्तानहं सम्प्रपद्ये ॥

तस्य विश्वपतिदीक्षितस्त्वगात्पुत्रभावमथ यस्य सन्निधेः ।

वासुदेवमखिलमोऽनुजः सर्वतन्त्रनिजतन्त्रतां गतः ॥

... .

अग्निष्टोमेन यक्ष्यमाणो भवति ॥ उक्ता हविर्यज्ञाः । अथेदानीमग्निष्टोम आरभ्यते । ज्योतिष्टोम इति कर्मनामधेयं । तस्याग्निष्टोम इति संस्थानाम । अग्निष्टोमस्तोत्रेण समाप्यत इत्यग्निष्टोमः । एवमतिरात्रादयः । तस्य तिस्रस्संस्थाः । अग्निष्टोम उक्थ्योऽतिरात्र इति केचित् । चतस्रः षोडशिना सहेत्यन्ये । तिस्र इति कथं प्रतिपन्ना(ः)। सूत्रालिङ्गात् । सूत्रञ्च क्रमान्तं । यदग्निष्टोमस्य क्रतुकरणं तदत्यग्निष्टोमस्य यदुक्थ्यस्य तत् षोडशि वाजपेययोः यदतिरात्रस्य तदप्तोर्यामस्येति ॥

End

'परिश्रयन्ति पूर्वां द्वारमपराञ्च' । हविर्धानस्य पूर्वापरे द्वारौ सन्निहितत्वात् । हविर्धानस्योभे द्वारावित्यापस्तम्बः । परिश्रयन्ति पिदधति(?)। रुद्रो वा एष यदग्निरिति ब्राह्मणं । 'अथादत्त आदित्यस्थाल्या औपशयं पात्र तस्मिन्नेतस्य राजस्तृतीयवेळां गृह्णाति य आदित्यस्थाल्या भवति कदा च न स्तरीरसीत्यनुद्रुत्य उपयाम गृहीतोस्यादित्येभ्यस्त्वा..... ।

Colophon (Leaf No 7.)

इति श्रीबौधायनसूत्रव्याख्यानचन्द्रिकायां यज्ञेश्वरदीक्षितोपनामकबाळादीक्षितकृतायां अग्निष्टोमे प्रथम प्रश्नस्समाप्तः ।

श्रीमुकुन्दाय नमो नम ।

Subject: Bodhāyana Śrauta Sūtravyākhyā otherwise known as Candrikā —a commentary on the Agniṣṭomakalpa —8-13 (6-8) Praśnas.

Remarks — The Ms is in good condition This Ms abruptly ends in the middle of the commentary on the ninth Khanda of the eighth Praśna The other works contained in this Ms. are —

(१) बोधायनश्रौतसूत्रव्याख्या (अग्निचयनव्याख्या) ॥

(२) .. (यूपैकादशिनीव्याख्या) ॥

The author of this commentary on Bodhāyanāgniṣṭomakalpa is Bālādīkṣita, otherwise known as Yajneśvara, son of Subrahmaṇya and grandson of Viśvapati of Sāhajirājapura or the modern Tiruvisanallour near Kumbakonam. According to the introductory verses given above, this Viśvapati is said to be the elder brother of Vāsudeva dīkṣita (the author of Bodhāyanāgnicavanavyākhyā— No 2064) and the son of Adhvaryu Mahādevavājapeyin (the author of Bodhāyanaśrautasūtravṛtti—Subodhinī No 2060) who flourished during the reign of king Sāhaji in Tanjore between 1684—1710 A D

बोधायनश्रौतसूत्रव्याख्या ॥

2064. BODHĀYANAŚRAUTASŪTRAVYĀKHYĀ.

Burnell's Catalogue No 9178 (a) Page 25 Right column. Substance—Palm leaf Size —16 × 2 inches Leaves—124 (1-124). Lines —10 to 15 to a Page Script—Grantha. No. of Granthas - 1500 Author—Vāsudevadīkṣita. Agnicavanavyākhyā—complete

Beginning

हरिः ॐ । श्रीगणेशाय नमः ॥

बोधायनं प्रणम्याग्नेः कल्पसूत्रं यथामति ।
द्वैधकर्मान्तसूत्राभ्यां सह व्याख्यास्यतेतराम् ॥

अग्नेरनारभ्याधीतत्वादनारभ्याधीतानाञ्च प्रकृतिगामित्वाद्दीक्षादिसम्बन्धादर्शपूर्णमासयोश्च दीक्षाद्यभावात् ज्योतिष्टोमाङ्गताऽध्यवसीयते । दीक्षादिभिर्जो(हिं ज्यो)तिष्टोमाङ्गं प्रसिद्धम् । तत्सम्बन्धोऽग्नौ भवति । श्रूयते हि दीक्षित उक्थ्यं विभक्त्यनूपसद्मग्निश्चिनाती'त्यादि । ननु(हि) ज्योतिष्टोमाङ्गमग्निः आप तु स्वतन्त्र एव । तथाहि--दीक्षादेः सोमाङ्गस्य सतः नाग्नौ सम्बन्धोऽस्ति येन सोमाङ्गव्यतिषङ्गात् सोमाङ्गता अग्नेः प्रसज्येत । अग्न्यङ्गत्वेनैव हि दीक्षादेः श्रवणम् ॥

* * *

अत एव अग्निकल्पसूत्रे आचार्यैरुक्तं 'षाड्विधं वा सप्तविधं वे'त्यादि । इत्यास्तां तावत् ॥ श्रीगणेशाय नमः ॥

ऋजुपक्षो वक्रपक्षश्चेति श्येनचिद् द्विविधः । वक्रपक्षोऽपि द्विविधः पञ्चपत्रं षट्पत्रश्चेति । तत्र ऋजुपक्ष पञ्चपत्रवक्रपक्षश्च श्येनचिदग्निः केशवस्वामिविष्णुवृद्धगोपालादिभिः प्रपञ्चितः इति षट्पत्रश्येनचितमधिकृत्याऽग्निकल्पसूत्रं द्वैधकर्मान्तसूत्राभ्यां सह व्याख्यास्याम.—

उखा. सम्भरिष्यन्नुपकल्पयतेऽश्वञ्च गर्दभञ्च तयोरेव रक्षाने मौञ्ज्यौ वा कुशमय्यौ वा + कुशलमिति

अग्निसम्भरणयोग्या स्थाल्य उखाः । ताः निर्वर्तयिष्यन् अश्वादीनि सज्जयति । अश्वगर्दभौ प्रसिद्धौ । तयो

अश्वगर्दभयोः रशने बन्धनार्थे रज्जू । रज्जुनिर्मिते कुश-
निर्मिते वा ।

End.

॥ नाग्निश्चिन्वा रामामुपेयात् ॥ रामा शूद्रस्त्री तां
अग्निचिन्नोपेयात् चतुषु वर्णेषु ब्राह्मणस्य विवाहविधा-
नात् शूद्रागमने प्राप्ते निषेधोऽयम् ॥

* * * *

अपि च तद्व्रतश्रुतिर्भवति । संवत्सरमभिप्रतायै
व्रतचर्येति ॥

Colophon :

इति श्रीमत्सन्ततपन्तन्यमानश्येनकूर्मसारस्थचक्राकारायनेकगुणविरा-
जमानमहाग्निविलसत्प्रौढानेकमहाध्वरस्य श्री(शाह)शरभतुल
[सी]जाख्यचोलमहीपालत्रयामात्यधुरन्धरस्य पदवाक्यप्रमाणपा
रावारीणस्य श्रीमत आनन्दरायविद्वत्सार्वभौमस्य पञ्चपुरुषीपो-
ष्येण बाल्य एव तद्दयानिर्वर्तितमाग्निचित्यानेकाध्वरेण तदध्वर्युणा
महादेववाजपेययाजिसुतेन अन्नपूर्णागर्भजातेन वासुदे
